पंथाअयनायविद्यते॥नकर्मणानप्रजयाधनेनत्यागेन॥नाहंवे
दैर्नतपसानदानेनचेज्यया॥अतेनचक्रधारणस्यमोक्षहेतुतायु
ज्यते॥नचवाच्यं॥चक्रधारणस्यमोक्षसाधानता।विधिबलादेव
सामान्यस्योपायांतरनिषेधस्यसंकोचभविष्यतीति।ज्ञानेनास्य

41

सहविकल्पेनानुष्ठानायोगात्॥ तथासति तत्प्रतिपादकशास्त्रस्या
ननुष्ठानलक्षणप्रामाण्यापातात्॥ अथ मन्यसे॥ यथा दर्शपौर्णमा
साभ्यां स्वर्गकामो यजेत॥ ज्योतिष्टोमेन स्वर्गकामो यजेत इत्येकमेव
फलं भवत्युभयोः॥ तथात्रापि भविष्यतीति। तत्र साधनवैषम्यात् उप
पद्यत एव॥ दर्शपौर्णमासयाजिनोपि ज्योतिष्टोमयाजिनोभिलषितः
स्वर्गः॥ अभिलाषानुरूप इत्यर्थः। अभिलाषभेदाद्भिद्यत इत्यर्थः॥ न
चात्र तथोपपद्यते मोक्षरूपे फले वैषम्याभावात्॥ किंचाधृतोर्ध्वपुंड्र ड्रः
श्चतचक्रधारीति मोक्षसाधनभूतध्यानांगतया विधायसान्मोक्षसा
धनतया तदेव विधीयत इति। वदन् कथं मीमांसानयनिपुणो हास्यो
न स्यात्॥ अंगस्य प्रधानफलसाधनत्वे अंगिनो वैयर्थ्यापातात्॥ य ॥२१॥
दुच्यते॥ धृतोर्ध्वँड्र इति मोक्षसाधनध्यानांगतया परंपरया साध्यत्वेन
पुं।

प्राप्तमेवमोक्षलक्षणंफलंचक्रधारणस्यप्रशंसार्थंजन्मांभोधिंतर्तुं
वरत्यादिषुअनूद्यते॥नमोक्षसाधनतयाचक्रधरणस्यफलश्रवणा
त्॥तदंगिफलएवानुवादःस्यादितिपुरुषार्थत्वंस्यात्॥अतःकथमत्रनि
र्वाहुउच्यते॥यत्रत्वेकेनैवक्रत्वर्थेनफलार्थत्वंप्रतीयते॥तत्रफलश्रव
णमर्थवादः॥यथायस्यपर्णमयीजुवतिनसपापंश्लोकंशृणोतीति॥अ
त्रह्युभयसंबंधपरत्वेवाक्यभेदप्रसंगात्फलश्रवणस्यप्रशंसार्थत्वेना
प्युपपत्तेः॥क्रत्वर्थत्वश्रवणस्यानन्यगतित्वात्॥फलश्रवणमर्थवादइति
वक्ष्यते॥फलेयत्रतुवाक्यार्थात्पुरुषार्थप्रकरणात्तत्रफलार्थत्वंतुसंभवत्ये
व॥प्रकरणस्यफलविशेषबोधकत्वायोगात्॥यत्रापिप्रकरणात्तु॥क्रतु
शेषार्थवादतयाफलार्थता॥तत्रापिप्रकरणस्यानन्यगतित्वात्फलश्रवण
स्यप्रशंसामात्रपरतयाप्युपपत्तेः॥फलमविवक्षितमेवयथाप्रयाजादौ

सु॰मी॰सा
॥२२॥

कर्मंचैतत्॥ यत्तस्यक्रियैषैतेवत्सप्रयोजमानोयेत्यार्थवादिकं
फलाश्रवणं॥ यत्रत्वन्योऽन्यनिरपेक्षवाक्यद्वयविशेषभूतार्थ
वादद्वयेनवाक्यार्थत्वंफलार्थत्वंचप्रतीयते। तत्रविशेषनिर्णाय
कप्रमाणाभावादुभयार्थत्वमथाश्रीयते॥ तदत्रचक्रगदाधारणस्य
वाक्यद्वयविशेषभूतार्थवादद्वयप्रतिपन्नत्वादुभयार्थत्वमप्यंगीकर
णीयं॥ तथापिवाक्यद्वयेपिविहितस्यतस्यतप्तचक्रादिधारणस्य
फलाकांक्षायामेकत्रसंनिहितत्क्रतुरेवफलीअन्वीयते॥ परत्र
इत्थं फलमेवोभयोरर्थयो॥ ऽप्राप्तत्वाद्विधिरेवभवति॥ तान्योऽन्यानुवा
दकताविधित्वेसंभवतिनिरर्थकस्यानुवादकत्वस्यायुक्तत्वात्॥
किंचफलार्थमस्तुवाक्यानुवादकत्वंक्रत्वर्थेनसंभवति॥ तस्मिन् ॥२२॥
वाक्येक्रत्वर्थत्वस्यकथंचिदस्यप्रतीतेः। फलवाक्यस्यक्रत्वर्थवाक्या

नुवादकत्वंफलेनतत्साधनक्रतुलक्षणयाभवति॥तच्चान्याय्यं॥
न्यायविरोधापिभावेपिमुख्ययावृत्याफलविधित्वलक्षणयाऽनुवा
दत्वश्रवणायोगात्॥ननुअंगिनिष्पाद्यफलमंगस्यास्वतंत्रस्यनोप
पद्यते॥तथात्वेंगिनोवैयर्थ्यापातात्॥अतोन्यायविरोधादनुवादत्व
श्रवणमितिचेन्न॥फलतारतम्येनांगवैयर्थ्यात्॥केवलांगसाध्यात्
फलादतिशायिततरंफलंतेनांगिनासाध्यतेइतिवाकल्प्यते॥कोविरो
धः॥यत्रत्वेतादृशान्यायविरोधश्चक्रादिधारणस्यमोक्षहेतुताप्रति
पादकवाक्येमोक्षलक्षणफलवैषम्याभावात्॥ज्ञानातिरिक्तमोक्षे व
साधाननिषेधकविरोधश्च॥तत्रागत्यालक्षणयाअनुवादत्वाश्र
णस्याविरोधात्॥क्वचिद्यनुवादकत्वमाश्रितमितिसर्वत्रतदंगीकारे
ऽतिप्रसंगः॥अतःक्रत्वर्थमपिचक्रधारणंनाफलसाधकतयापुरुषार्थ

परंपरयामोक्षहेतुरिति। वर्द्धमानसरंजकः पंथाः ॥ नन्वस्तु क्रत्व
र्थत्वं पुरुषार्थत्वं चादिवानक्तं विभृयुस्तज्ज्ञानासः ॥ उपपत्या स्विक्रा
र्याः शंखचक्रादयस्तथेत्यादिनानित्यत्वं प्रतीयते ॥ तत्कथमुपपद्य
ते ॥ फलार्थमेव हि मतस्य फलकामनानिपतत्वेनानित्यः प्रयोगः स्या
त् ॥ क्रत्वर्थत्वेपि फलसंबंधस्य कर्तोरप्यनिर्दिष्टत्वेन न तत्प्रयोगस्यानि त्य
त्यत्वेनास्याप्यनित्यः क्षिप्रयोगः स्यात् ॥ एतादृशस्य कथं नित्यत्वं यु
ज्यते इति ॥ तदत्र ब्रूमः ॥ विनियोगपृथक्त्वेदेवोपपद्यते इति ॥ यथाग्नि
होत्रं जुहुयात्स्वर्गकामः ॥ यावज्जीवमाग्निहं जुहोतीति विनियोगभे
दादेकस्य काम्यत्वं नित्यत्वमपि ॥ तद्वदत्रापीति पाप्मानमरातिं तरेमेति
पापनिवर्त्तकतयाप्रायश्चित्तरूपत्वं ॥ नैमित्तिकत्वमास्थेयं ॥ चक्रादि
धारणस्य तदपि युज्यत एव ॥ याजापित्वाप्रतिगृह्य वानश्ननुत्रिः स्वा

ध्यायमधीपीतत्रिरात्रंवासावित्रीमितिनित्ययोरेवध्ययनगायत्री
जपयोर्नैमित्तिकत्वदर्शनात्॥देवताभ्योवाएषआवृत्ततेयोपतृइ
त्युक्ताएषराजातेयस्त्रेधातवीयेनयजेत॥तेतिदीक्षाशेषत्वेनक्रत्वर्थस्यै
वत्रेधातवीयस्यनैमित्तिकत्वदर्शनात्॥वैश्वानरेष्टेर्नैमितिकत्वका
म्यत्वयोर्दर्शनाच्च॥तस्मादुच्चित्वांतर्भवेनप्रसिद्धसकलक्रतुशेषभाव
स्यनानाफलविनियोगाच्चप्रगीतकाम्यत्वस्य प्रायश्चित्तस्वरूपत्वया
प्रापितनैमित्तिकत्वस्यसहभरणश्रवणाच्चनिर्मितनित्यत्वस्य॥तस्मच्च
क्रादिधारणस्यबाहुमूलभुजमध्ययोरवश्यकार्यत्वमितिसिद्धं॥अस्त्वे
वमनेकार्थत्वाच्चक्रधारणस्यकाम्यानुष्ठानपरिपाटी॥उच्यते॥तेनप्र
तिक्रतुतस्यावृत्तिः॥प्रसज्येत॥उच्यते॥नास्यावृत्तिःकिंतु॥अशेषक्रतु
शेषतयास्यसकृदेवानुष्ठानं॥तथाहि॥न्युच्चित्वांतर्भावेनखल्वस्य

47

सु॰मी॰सा
॥२७॥

क्रतुशेषत्वशुचित्वंचांकनरूपकिणसंबंधाद्देहस्यभवतिवि
शुद्धचक्रांकितंदेहंपवित्रमितिवैश्रुतिरित्यंकनसंबंधेनपवित्र
त्वश्रवणात्॥नतश्चपवहंकनकिणसंबंधंगात्रस्यपवित्रत्वात्॥
तावन्मात्रोपजीवनेनैवक्रतूनांप्रवृत्तिर्नपौनःपुण्ये॥नकृतव
श्चक्रधारणमनुष्ठापयंति॥यथानैकांगप्रधानयोगार्थानीमपि
बर्हिर्लवादीनांनयावत्प्रधानमावृत्तिः॥किंतुसकृदेवानुष्ठानं॥संस्कृ
तबर्हिषएवसर्वेषांसाधनत्वात्॥यथावाकर्तृशुध्यापादकानांस्ना ट
नाचमनादीनांकृत्वाहोसकृदनुष्ठितमेवसर्वक्रतुशेषत्वमश्नुते॥तद्व क
त्चक्रादिधारणं॥किणरूपताविगमेपुनरधिकमंकनंकर्त्तव्यंगात्रस्य ॥२७॥
पवित्रतार्थं॥अंकनसंबंधेनैवगात्रस्यपवित्रत्वात्॥सदाधारणवि
धानाच्च॥नित्यकाम्यस्वरूपयोरपिकामनित्यत्वसिद्धेरुभयार्थंसकृदे

न३

वानुष्ठानमिति। तदुभयार्थमनुष्ठिते नैवांकनेन देहस्यपवित्र
त्वसिद्धेस्तत्तीयार्थमपिसकृदेवानुष्ठानं तेन नैमित्तिकस्यसकृदेवा
नुष्ठानमिति॥ केचित्तु नैमित्तिकस्यनु निमित्तेसत्यनुष्ठीयमानत्वा
दनुष्ठानस्यावृत्तिः॥ निमित्तावृत्तावपियावन्निमित्तनैमित्तिकस्या
नुष्ठेयत्वाहावृत्तिरेवानुष्ठानस्यात्। फलार्थस्यनुप्रतिफलमनुष्ठान
स्यावृत्तिरेकानुष्ठानेनसर्वेषांफलानांयुगपत्सिद्धेरसंभवात्॥
लोकेपिघटसाधनीभूतादंडचक्रादयोपियुगपदेकमेवघटमु
त्पादयंति॥ नगणकं॥ प्रतिपादिताचकामेभ्योदर्शपौर्णमासावि
निसकलफलसाधकस्यदर्शपौर्णमासस्यप्रतिफलमनुष्ठानावृ
त्तिः॥ ससर्वकामाधिकरणेऽतएवकाम्यस्यापिकारीर्यादि
कस्यपुनःफलाकांक्षायामनुष्ठानमंगीकुर्वंतितंत्रज्ञाः॥ तस्मा

49

सु॰मी॰सा
॥२५॥
६३

स्प्रतिपादितैवचक्रादिधारणानुष्ठानपरिपाटीयुक्ता॥ ननुदि
वानक्तंविमयुक्तज्ञानासङ्गत्यविशेषेणसकलनस्यधार्यत्वंप्र
तीयते॥ कश्चिद्दक्षिणेतुभुजेविप्रइतिब्राह्मणस्यधार्यत्वंप्रतीय
ते॥ परत्राधारयेद्देसवशंखंचक्रंवाहोतुर्दक्षिणेइतिवैष्णवस्य॥
तेनसामान्यजनशब्दस्यापशुशब्दस्यविशेषोपरिवसानेसाकांक्ष
स्वच्छागइवयोप्रादेपर्यवसानमेवन्याय्यं॥ नत्वकदशानांतस्यानुवा
दकत्वमस्यविशेषपर्यवसानाकांक्षारहितत्वात्॥ एवनियतत्वादनु
वादेप्रयोजनाभावाच्चतेननसर्वकर्तृकत्वंचक्रादिधारणस्यस्यादि
तिचेत्॥ उच्यते॥ यद्यपिजनशब्दस्यापिविशेषपर्यवसानाकांक्षाभ ॥२५॥
वतितथापि॥ ब्राह्मणैःक्षत्रियैर्वैश्यैःशूद्रैरपितथैवच॥ अर्चनीय
श्चसेव्यश्चनित्ययुक्तैःस्वकर्मसु॥ अग्निनैवतुसंतप्तचक्रमादायवैष्णवः॥

दाहयेत्सर्ववर्णानां हरिस्मालोक्यसिद्धये। यो नरो मम भक्तश्चादि
व्यं चिह्नं तु धारयेत्॥ श्वपाको वाथ गोघ्नो मम लोकमवाप्नुयादिति
वचनैः॥ सर्वाधिकारत्वप्रतीतेर्न विशेषपर्यवसानं भवति॥ तथा च
विप्रादिशिष्टानामेतद्द्विवर्णवदेकदेशानुवादकत्वेव॥ न चानुवादो
निःप्रयोजन इति मंतव्यं॥ तेषामकरणे प्रत्यवायाधिक्यपरत्वेन तस्य
च सार्थकत्वात्॥ अनंतवह्नेनाभावस्य सर्वधर्मत्वेपि तस्मादाहिताग्नि
र्नानंतं वहेदिति॥ वचनस्य तस्यानंतवचनेप्रत्यवायाधिक्येपरत्वं य
था तथा ब्राह्मणस्य तत्रापि वैष्णवस्य चक्राद्यधारणे प्रत्यवायबाहु
ल्यप्रतिपादनार्थं अनुवादो भविष्यति॥ विद्वेषातिक्रमे प्रत्यवायभूय
स्त्वं युक्तमेव॥ तदुक्तं॥ उपवीतादिवद्धार्याः शंखचक्रगदादयः॥ ब्रा
ह्मणस्य विशेषेण वैष्णवस्य विशेषतः॥ अंकयेच्छंखचक्राभ्यां द

K K S U LIBRARY
RAMTEK
441 106
M-1849
Dist. Nagpur

सु॰मी॰सा

॥२६॥

क्षिणेतरपार्श्वयोः॥ विप्राणां वेदविदुषां वैष्णवानां विशेषत इत्यत्र
विशेषवचनं॥ तेषामकरणे प्रत्यवायाधिक्यं व्यनक्ति॥ अन्यथा स
र्ववर्णसाधारणस्य तेषु विषवचनं व्यर्थं स्यात्॥ एवं श्रुतिशातसिद्धं त
प्तचक्रादिधारणं स्मृतीतिहासवाक्यान्युपवृंहयंति। यथाह वृद्धमनुः द
॥ऊर्द्ध्वपुंड्रं तथा चक्रं नित्यं वै धारयन्नरः तेन तस्याशुभं नश्येत् शुभमस्य
प्रवर्द्धते॥ शांडिल्यस्मृतौ॥ पत्नीपुत्राह्निकं सर्वं गृहोपकरणानि च॥ अं
कयेच्छंखचक्राभ्यां नामकुर्याच्च वैष्णवं॥ नशुद्धयेदासनानि शायनं
निमहीतलं॥ स्थापयेत्क्षेवमध्येतु शिलां चक्रादिचिह्नितामिति
॥पद्मपुराणे॥ धारयेद्विष्णुभक्तस्तु चक्रं वाहौ तु दक्षिणे॥ वा
मे तु शंखराजानं धारयन् विष्णुमाप्नुयात्॥ चक्रेणैवांकितो
विद्वान् वादेवं समाश्रयेत्॥ भावभक्तिं समास्थाय ब्रह्मलोकं प्रयास्यति॥

॥२६॥

सु१

अग्रेनपञ्च॥पंचायुधानिधार्याणिभक्त्याश्रद्धोपबृंहितैः॥लला
टेमूर्ध्निहृद्बाह्वोरेकत्रैवपृथक्पृथक्॥ललाटेतुगदाधार्यामूर्ध्नि
चापंततःपरं॥नंदकंचैवहृदयमध्येशांखचक्रेभुजद्वये॥तथाच
विधिवत्कृत्वापंचायुधविधानतः तत्तन्मंत्रेणमंत्रज्ञःप्रतिष्ठाप्यपृ
थक्पृथक्॥अग्निमध्येसमारोप्यविधिवत्पूजयेत्ततः॥अंकयेद्वि
धिवद्बुलन्अप्रमतःसमाहितः॥वर्णाश्रमेषुनिष्ठानांअन्येषांचवि
शेषतः॥कर्त्तव्यंभगवद्भक्तैःसिद्धैर्मुक्तैश्चयोगिभिः॥सिद्धैःसिद्धिका
मैःमुक्तैःमुक्तिकामैः॥वाराहपुराणेच॥मन्मुद्रांकितदेहोयोमद्भक्तो
भुविदुर्लभः॥मामपेक्षतिधर्मात्मामामदेकांतेनचेतसा॥चक्रांकि
भुजाकेचिद्यत्रपुरुषाविष्णुचक्रेणमुद्रिताः॥तेषांदर्शनमात्रेणम
हापापंविनश्यति॥भूतप्रेतपिशाचाश्चडाकिन्यश्चवसुधरे॥सर्वे

53

तद्ग्रामंयांनिपत्रचक्रांकितोवसेत्॥तत्रैव॥वासुदेवांकनंकुर्या
दात्मनोवांकनंबाहुमूलयोः॥सोश्वमेधफलंप्राप्यविष्णुलोकेमही
यते॥लिंगेच॥अव्यक्षरविहः सर्वेविष्णुचक्रांकितास्तथा॥श्राव
कावासुदेवस्यतथैवनहननर्त्तकाः।कीर्त्तिश्रवणतत्पराः अन्येचवै
ष्णवास्तत्रसर्वेचचक्रेणलांछिताइति॥वामने॥लीलयातुलिखेद्यस्तु
बाहुमूलेसुदर्शनं॥कुलकोटिंसमुधृत्यसंगछेत्परमंपदं॥येषांच
क्रांकितंगात्रंलोकेसुपरिदृश्यते॥तेवैस्वर्गस्यनेतारोब्राह्मणाभुवि
देवता॥मत्स्यपुराणे॥शंखचक्रांकनंकुर्यादात्मनोबाहुमूलयोः॥
कलत्रापत्यभृत्यानांपश्वादीनांचमुक्तये॥मच्चक्रांकितदेहोयोमद्भ
क्तोभुविदुर्लभः॥निवासेनिवसेन्मर्त्योरप्याज्ञाभंगकृद्धरेः।मृत्युम
वमत्येत्यर्थ॥गरुडपुराणे॥विष्वक्सेनःस्वयंचक्रमाहायात्मविभूषणं॥

प्रयछतिमहातेजाहरिश्चक्रानुकंपनः॥विस्नुचक्रांकितंदेहंयविभिर्ति
वेश्रुतिः॥चक्रांकितायदातव्यंहव्यंकव्यंद्विजोत्तमैः॥कूर्मपुराणे॥च
क्रादिधारणंपुंसांपरसंधवेदने॥पतिव्रतालक्षणंहिवल्लयोद्वि
विसूषणं॥वायवीपुराणे॥चक्रादिधारयेद्विप्रोललाटेमस्तकेभुजे॥
पातकादिविशुध्यर्थंभवरोगविनाशनं॥चक्रांकितभुजेविप्रंयोवै
निंदतिसर्वदा॥सयातिनरकंघोरंयावदाहूतसंभवं॥चक्रांकि
तभुजेदृष्ट्वायस्तुतंनाभिवादयेत्॥तिर्यग्योनिशतंप्राप्यविष्टायां
जायतेकृमिः॥तस्मारणान्महापापैर्मुच्यतेनात्रसंशयः॥ऊर्ध्व
पुंड्रंशिखावंधंचक्रलांछनसंयुतं॥चक्रलांछनहीनस्यवि
प्रस्यविफलंभवेत्॥श्रीभागवतेउपपुराणेविशेषे॥चक्रांकि
तस्यसंनिधौतपःकुर्यात्प्रयत्नतः॥स्नानंदानंजपोहोमस्तत्सर्वं

सु॰मी॰सा

॥२८॥

चाक्षयंभवेत्॥संवत्सरेणयत्पापंमनसाकर्मणाकृतंत
त्सर्वंनश्यतेतेषांसकृच्चक्रस्यधारणात्॥क्रूरहाहभयंचैवचौरा
ग्निजंभयंतथा॥सर्वंतत्क्षयमायातियत्रचक्रांकितोवसेत्॥इतिला
समुच्चये॥केचिच्चक्रांकितास्तत्रप्राणिनःपुण्यदर्शिनः॥विचरंति
यथानाकंपुण्यतीर्थप्रशंसिनः॥भारतेभीष्मपर्वणि॥ब्राह्मणैःक्ष
त्रियैर्वैश्यैःशूद्रैस्तल्लक्षणांकितैः॥श्रीहरिवंशे॥चक्रांकितोःप्रवेष्टव्या
यावदागमनंमम॥तत्रैवयमकिंकरसंवादे॥भवतांभवतापघ्नविष्णुसं
श्रयमद्भया॥मामांज्ञांभंगकृत्तैर्नैवभविष्यतिनरःक्वचित्॥निवसंति
पदेसेवपातमीक्षुःपुरुषचरस्यहितरस्यदृष्टिपात॥नचगतिरथवा
ममास्तिचक्रप्रतिहतवीर्यबलस्यसोऽन्यलोकेइतिविष्णुपुराणे॥भा ॥२८॥
रते॥नान्यंदेवंनमस्कुर्यान्नान्यंदेवंनिरीक्षयेत्॥चक्रांकितःसद

तिष्टेना भक्तः पांडुनंदनेति ॥ ब्रह्मांडेप्येवमेव प्रतिपादितं ॥ वै
ष्णवा मुनयः पुण्या विष्णुलक्षणलक्षिताः ॥ ध्यानिनो योगनि
रताः सर्वा विष्णुपरायणाः ॥ तस्मिन्नेव ब्रह्मनारदसंवादे ॥ सुद
र्शनेन यस्याल्लांछितं तु भवेत्सदा ॥ देहे तस्य वसेन्नित्यं श्रिया युक्तः
स्वयं हरिः ॥ कृष्णायुधांकितं देहं छायमोपि हृदिस्त्रांकते ॥ उपसर्गाः
क्षयं यांति रोगा नश्यंति दूरतः ॥ यत्फलं पृथिवीदाने कुरुक्षेत्रे रवि
ग्रहे ॥ विष्णुचक्रांकिते देहे तत्फलं समवाप्नुयात् ॥ चक्रांकितश
रीरस्य गृहे मुक्तिः करस्थिता ॥ अस्पर्श्यमपि मुक्त्यै स्यात् किं पुनः पु
ण्यभूमयः ॥ तत्रैव ॥ ततः प्रभृति देवाद्याः सर्वे चैव मुनीश्वराः ॥ चि
ह्नं कृष्णायुधादीनां नित्यं कुर्वंत्यतंद्रिताः ॥ ऋषयः सिद्धगंधर्वाः पा
ताले पन्नगेश्वराः ॥ देहे कुर्वंति सततं शंखचक्रादिलांछितं ॥ त

सु॰मी॰सा
॥२९॥

स्मात्त्वमपि देवर्षे कुरु रुक्मायुधांकितं ॥ स्व[illegible]देह कुरु सर्वत्र सर्व
सिद्धिर्भविष्यति ॥ नारायणायुधैर्नित्यं चिह्नितो यस्य विग्रहः ॥
पापकोटिशतं दग्धं तस्मिन्दृष्टे भवेत्सदा ॥ राक्षसाश्च पिशाचाश्च
दानवा दैत्यजातयः ॥ रुक्मायुधांकितं दृष्ट्वा नृपनश्यंति दूरतः ॥
चक्रांकितलसद्देहो यः श्राद्धं कुरुते नरः ॥ विधिहीनं स चेत्क्वापि
त पितॄणां तु गयासमं ॥ चक्रांकिततनुर्विप्रो भुंक्ते यस्य च वेश्मनि ॥
तदन्नं स्वयमश्नाति पितृभिः सह केशवः ॥ रुक्मचक्रांकितो भू
त्वा जलान्नं प्रददाति यः ॥ तदन्नं मेरुतुल्यं स्यात् ॥ जलं सप्तार्णवो
पमं ॥ यस्यांतकाले गात्रं तु लांछितं चायुधैर्हरेः ॥ दृष्ट्वा शीघ्रं प
लायंते यमेन सह किंकराः ॥ इत्यादिना तथा तस्मिन्नेव ब्रह्मां ॥२९॥
डे ॥ उमामहेश्वरसंवादे ॥ साधुसाधु महादेवि साधूनां च हितं यदि ॥

वैष्णवानांतुमाहात्म्यंतववक्ष्यमिसुव्रते॥शंखचक्रांकितान्वि
प्रान्यःपूजयंतिमानवः॥ससाक्षाद्विष्णुसामीप्यंलभतेनात्रसंश
यः॥विष्णुचक्रांकितंविप्रंयोभूम्यामभिवादयेत्॥ललाटयस्तुवैषी
णिविष्णुलोकेमहीयते॥सगोत्रंयद्यपिश्राद्धंचक्रांकितभुजंचरेत्॥
ससाक्षाद्विष्णुसामीप्यंमृतःपित्रालभेत्सदा॥विष्णुचक्रांकितंदृष्ट्वा
योभ्युत्थायकृतांजलिः॥स्वकीयंकुलमुद्धृत्यब्रह्मलोकेमहीयते॥
चक्रांकितभुजायस्मिन्पंक्तिमध्येतुभुंजते॥सापंक्तिःस्वर्गलोकेहि
देवपंक्तिषुयुज्यते॥श्राद्धिकेमासिकेचापिचक्रांकितभुजश्चरेत्॥
शेरवात्कुलमुद्धृत्यब्रह्मलोकेमहीयते॥शंखचक्रांकितंविप्रंदृष्ट्वायो
ह्याहृतोभवेत्॥परमानंदमाप्नोतिकिंपुनस्त्वैहिकंपदं॥येकेचिदत्रपु
रुषाविष्णुचक्रेणमुद्रिताः॥तेषांदर्शनमात्रेणमहापातकनाशनं॥

क१

वर्षा।लि
रेलु ३

59

सु·मी·सा

॥३०॥ मं२

चक्रांकितस्य नामानि यो वदेद्भक्तिमान्नरः ॥ सर्वपापविनिर्मु
क्तः स याति परमं पदं ॥ चक्रांकिताय विप्राय यो भक्त्यान्नं ददाति
यत् ॥ अन्नसंख्यानुवर्षाणि ब्रह्मलोके महीपते ॥ विष्णुभक्ता
य विप्राय चक्रकुलाय मानवः ॥ गोचर्ममात्रां भूमिं दत्वा राज्यमवा
प्नुयात् ॥ अग्निना तप्तचक्रेण बाहुमूलेषु लांछिताः ॥ सर्वपापा
नि संतीर्य भविष्यंतीश्वरोपमाः ॥ विष्णुस्थानेषु सर्वेषु ब्राह्मणाश्च
क्रलांछिताः ॥ ते हि विष्णुमया भूत्वा विष्णुसायुज्यमाप्नुयुः ॥ वह्नितप्
तेन चक्रेण बाहुमूले तु लांछिताः ॥ रौरवादीन्नरकानुद्धृत्य यांति विष्णोः प
रं पदं ॥ विष्णुचक्रांकिता यत्र वसंति नरपुंगवाः ॥ तद्देशोस्यन्नमात्रे
श्च वैष्णवत्वं लभंति ते ॥ विष्णुचक्रांकितं विप्रं विष्णुरूपमिति स्मरेत् ॥३०॥
॥ तस्य सर्वाणि पापानि दह्यंते नात्र संशयः ॥ विष्णुचक्रांकितो वि

प्रोयस्मिन्देशेवसेत्सुखी ॥ लब्धंत्रांमंगलंपुण्यंवैष्ण[illegible]नाप्रियं ॥ व
दुः ॥ विष्णुश्चक्रांकितंविप्रमेकरात्रंतुवासयेत् ॥ विष्णुलोकनिवासी
स्तुपूज्यएवनसंशयः ॥ शुभंपूजादिमुक्त्यंतंयःकरोतिसमानवः ॥ च
क्रांकितायविप्रायविष्णुसायुज्यमाप्नुयात् ॥ चक्रांकितायविप्रायक
न्यादानंकरोतियः ॥ परमानंदमाप्नोतितद्विष्णोःपरमंपदं ॥ विष्णुभक्त
तमाःपुण्याःशंखचक्रांकिताद्विजाः ॥ क्रीडार्थमपिपद्युःसधर्मः
परमोमतः ॥ यस्मिन्तीर्थेकृतस्नानंवैष्णवाश्चक्रलांछिताः ॥ तस्मि
न्स्नानंप्रकुर्वीतविष्णुसायुज्यमाप्नुयात् ॥ अतिपापप्रसंगेहिवि
ष्णुचक्रांकितस्यहि ॥ पादोदकंपिबेद्यस्तुसर्वपापैःप्रमुच्यते ॥ चक्रांकि
तायविप्रायविष्णुभक्तायदीयते ॥ भिक्षामात्रमितिब्रुवन्वैष्णवींगति
माप्नुयात् ॥ चक्रांकितायविप्रायमहादेविमहामते ॥ शाकपात्रप्रदानेन

सु·मी·सा

॥३१॥

ति१

मुक्तिं यांति हि सूरयः॥ पादौ पवित्रभूतौ तौ विप्रस्य चक्रांकितस्य नु
प्रक्षालनं द्विजः कुर्यात्स शुद्धिं प्रयाति हि॥ चक्रांकितं द्विजवरं यो दू
षयति मानवः॥ स चांडालो महादेवि रौरवं नरकं व्रजेत्॥ ब्रह्महत्या
सुरापानं स्तेयं गुर्वंगनागमः॥ चक्रांकितस्य निंदा च पंचैते ह्यतिपाति
काः॥ यः पुत्रः पितरं द्वेष्टि तं विद्यादन्यरेतसं॥ चक्रांकितं तु यो द्वेष्टि
तं विद्यादन्यरेतसं॥ ब्रह्मचारी गृहस्थश्च वानप्रस्थोथ भिक्षुकः॥ य
त्पुण्यं कुरुते तत्तु सर्वं चक्रविहीनतः॥ यज्ञदानतपोहोमभोजनं पि
तृतर्पणं॥ चक्रलांछनहीनस्य विप्रस्य विफलं स्मृतमित्यादि॥ एते
न मन्वादिभिरनुपादानं चोपरिहृतं॥ मन्वादिभिरनुपात्तस्यापि स्मृ
तिपुराणेतिहासवचनत्रातोपायभूतस्य धर्मत्वादेवं॥ न ह्येक एव स ॥३१॥
र्वे आचारा उपपत्ताः स्युः॥ स्मृतिष्वपि सर्वेषां शाखाप्रत्ययन्यायस्यांगी

कृतचात्अतएवमनेकश्रुतीतिहासपुराणप्रसिद्धं तत्सचक्र
धारणंभगवच्छास्त्रेविस्तरेणप्रतिपादितं॥ तथाहि॥ चक्रांकि
तेभ्योविभ्यंतिदेवा नाराकरास्समाः॥ अवमानक्रियातेषांसं
हरंत्यखिलंवलात्॥ कालेनैतावतातेषुनरकेषुतुश्वनरः॥ नहन्यं
तेमहावीर्याःप्रभावात्परमेष्ठिनः॥ तत्रैवतृतीयपादे॥ विज्ञापितास्त
थात्रिष्याश्चक्रलिंगसमन्विताः॥ देवएवमभवंन्येतेनान्येषांकर्मका
रकाःइतितेनाभ्यनुज्ञातश्चक्रलिंगधरोभवेदिति॥ श्रुतिप्रपटले॥
चक्रादिधारणंपुंसांपरसंबंधवेदनं॥ पतिव्रतालक्षणंहिवलयादि
विभूषणं॥ मनिष्ठाहिवसंज्ञात्वाकृत्विग्मिर्द्विजसत्तमैः॥ एकांतेमुनि
मुख्यैस्तुकृतचक्रादिलक्षणैः॥ यजमनःप्रकुर्वीतवेद्यादेस्स्थापनंहरेः॥
परमेश्वरसंहितायां॥ श्रोत्रियोभगवद्भक्तोगृहस्थःशास्त्रवित्तमः॥ च

63

क्रलिंगधरोविप्रः प्रतिष्ठाकर्तुमर्हति॥तेनप्रतिष्ठितस्तत्र सन्निधत्ते
सदाहरिः॥देवतांतरंभक्तोवासमबुद्धिरथापिवा॥नास्तिकोवेदहीनोवा
नप्रतिष्ठांसमाचरेदिति॥नारदपद्धतौ॥गृहस्थः श्रोत्रियोविप्रोनित्यंधर्म
रतःशुचिः॥शांतश्चचक्रधरोशांतोहरिभक्तोजितेंद्रियः॥शास्त्रज्ञः कर्म
दक्षश्चप्रतिष्ठांकर्तुमर्हति॥तथान्यत्रापि॥एवंतदीयाविप्राश्चक्षत्रिया
वैश्यजातयः॥मौल्याद्यास्तथान्येचतस्यचिह्नविवर्जिताः॥भवेयुःस
र्वदातस्मात्शंखचक्रगदांबुजैः॥लोहैरनलसंतप्तैः सूक्तमंत्राधिवा
सितैः॥पूजितैरर्घगंधाद्यैरंकितव्याः क्षणेनहि॥त्रय्यंतज्ञानसंपन्नाय
थोक्ताचारनिष्ठिताः॥विप्रातेनेचरत्नङ्गाश्चनदैवप्रतलक्षणाः॥तदानि
येन्याविज्ञेयाः समयः श्रवणादिषु॥शास्त्रोदितासुसर्वत्रसामग्रीषुम ॥३२॥
हामते॥सनत्कुमारसंहितायां॥सर्वपापविनाशंहिरथांगस्यतुधारणं॥

ग१

सर्वकल्याणदमिदंपश्चात्संसारनाशनं॥सुवर्णरजताद्यैर्वालोहेना
पितथैवच॥तथारथांगमष्टारंसुनाभंचसुवृत्तकं॥ज्वालाच
तुष्कसंयुक्तंकृत्वाचैवंविधानतः॥प्रणेप्रवताप्यविधिवद्धारये
द्भक्तिसंयुतः॥इति॥तथागरुडसंहितायां॥शृणुष्वविहगेशान
सदात्वंवचनंमम॥श्रुतिस्मृतिस्वरूपेणजगतामुकारकं॥सर्व
कर्माधिकारश्चशुचीनामेवचोदितः॥शुचित्वंनियतंतस्ययोवि
भर्त्यायुधानिमे॥अश्वमेधसहस्रेणवाजिमेधशतेनवा॥यत्फलं
श्रूयतेतस्मान्मदीयायुधधारणात्॥तद्धारणविधिंवक्ष्येमहा
पातकनाशनं॥शंखचक्रंसमाराध्यगंधपुष्पादिभिःशुभैः॥अ
नवद्यंचनैवेद्यंविनिवेद्यस्वभक्तितः॥सुदर्शननमस्तेस्तुपांचजन्यं
नमोस्तुते॥इतिमंत्रंसमुच्चार्यनमस्कुर्यात्पुनःपुनः॥ततःपाव

स्त्रे ५

कमभ्यर्च्यजुहुयाद्वेस्मवाहुतीः ।। वेदादिभिस्तथामंत्रैः श्रुवे
णजुहुयात्घृतं ।। चक्रंचपांचजन्यंचतस्मिन्नग्नौविनिक्षिपे
त् ।। पुनश्चपूजाकर्त्तव्यागंधपुष्पोपहारकैः ।। मद्भक्तानप्यनुमतः
प्रणमेत्सुनरोसुधीः ।। अग्निनैवतुसंतप्तंचक्रमाहायमामकं ।। द
क्षिणंबाहुमूलंतुदेहेह्विगतसाध्वसः ।। अथवान्येनुकेनापिवैष्ण
वेनमहात्मना ।। लांछनंविभृयाच्चक्रंपांचजन्यंतथैवच ।। उच्चा
रयन्निमंमंत्रंहृदयेमांविचिंतयन् ।। यएतेनविधानेनशंखंचक्रं
चधारयेत् ।। त्रिषुलोकेषुसक्तोयोमद्भक्तइतिगीयते ।। गरुत्मानु
६ वाच ।। चक्रादिधारणंदेवघोरसंसारतारणं ।। अत्रापिकारणंब्रू ।।३३।।
हिविधेःकेकेधिकारिणः ।। श्रीभगवानुवाच । गरुत्मान्नविरो
धेनसर्ववर्णेष्वयंविधिः ।। भजस्वनित्यंचचक्रं · · नमप्रीतिकरंशुभं ।।

विप्रो वा यदि वा क्षत्रो वैश्यः शूद्रस्तथैव च ॥ अन्ये संकरजा
तीश्च चक्रांकामम वल्लभा ॥ चक्रांकितशरीरास्तु हव्यकव्ये द्विजा
तये ॥ यो ददाति नरः प्राज्ञः स भवेत्पुण्यभाग्नरः ॥ शरीरे यस्य क
स्यापि दृश्यते वै सुदर्शनं ॥ तस्मै कुर्वीत यत्नेन नमस्कारं सदा नरः ॥
मच्चक्रांकितदेहाय यस्तु द्वेषं समाचरेत् ॥ वदेद्वा परुषं वाक्यं मे द्वेषी
नराधमः ॥ तस्मात्सर्वप्रयत्नेन मद्भक्ते हितमाचरेत् ॥ अतस्तस्मात्
श्रुतिस्मृतीतिहासपुराणसदागमवचनव्रातेन निर्णीतानुष्ठानस्यत
प्तचक्रादिधारणस्य सदाचारेपि प्रामाण्यमनुमापयतीति प्रतिया
हितं हि सदाचारस्यापि प्रामाण्यं श्रुतिस्मृतिभ्यां ॥ अथ यदि ते कर्मवि
कि २ चिकित्सा वा वृत्तविचिकित्सा वा स्यात् ॥ ये तत्र ब्राह्मणाः समदर्शिनः यु
क्ता आयुक्ता अलूक्षा धर्मकामाः स्युः ॥ यथा ते तत्र वर्तेरन् ॥ तथा ते

सु॰मी॰सा

॥३५॥

ष्ठुवर्त्तेथाइतिश्रुतिंवेदोखिलोधर्ममूलंस्मृतिशीलेचतद्विदां॥आचा
रश्चैवसाधूनांआत्मनःशुद्धिरेवच॥श्रुतिःस्मृतिःसदाचारःस्वस्यच
प्रियमात्मनइत्येवंसतिकलौखलुभविष्यंतिनारायणपरायणाइत्या
दिमहर्षिसंभावितैःशिष्टैरनुष्ठानोच्चक्रादिधारणस्यधर्मत्वंसिद्धं॥यदु
क्तं॥मन्वादिभिर्नानुष्ठीयतइति॥तन्नुनविदुर्हरिवाल्हीकानस्मरंतिह
रिंकचित्॥नार्चयिष्यंतितंमैत्रेयपाषंडोपहताजनाइति॥वाल्हीका
दितामसजनानुष्ठानंनाधर्मतांगमयति॥ननुचक्रादिधारणनुष्ठा
तृणांशिष्टत्वमननुष्ठातृणामशिष्टत्वंचकुतइतिचेदुच्यते॥सर्वेषामेव
धर्माणमुत्तमोवैष्णवोविधिः॥रक्षतेभगवान्विष्णुर्भक्तानात्मशरीरव
वत्॥नारायणैकनिष्ठस्ययायाचेष्टातदर्चनं॥योयोजल्पस्तुतज्ज्ञानंवी ॥३५॥
क्षणंतन्निरीक्षणं॥तत्पादावतुलंतीर्थंतदुच्छिष्टंतुपावनं॥तदुक्तिमात्रं

मंत्राग्न्याछुतेष्टमखिलंमुचि॥ मद्भक्तजनसंमर्द्दपादपंकजनघहनात्॥ चतुःसागरपर्यंतापावनास्याद्वसुंधरा॥ इत्यादिना भगवद्भक्तानामुत्कृष्टत्वंचापिगीतं॥ इतरेषमशिवत्वंच॥ चतुर्वेद्यपियोविप्रोवासुदेवंनविंदति॥ वेदभारभराक्रांतःसवैब्राह्मणगर्द्दभः॥ विष्णुभक्तिविहीनोयःसर्वशास्त्रार्थवेद्यपि॥ ब्राह्मण्यंतस्यनसच्चेत् तस्योत्पत्तिंनिरूप्यतां॥ त्यक्त्वाविष्णुंयेभजंत्यन्यदेवंत्यक्तस्वार्थास्तेत्यजाज्ञाजनेषुदृष्ट्वाऽहित्वातान्समाभाष्यमोहात्विष्णोर्भक्तान्वीक्ष्यसंस्पृश्यभुक्त्वेत्यादिवचनशतैरवगतं॥ ननुचक्रादिधारिणोऽल्पीयांसोबहवस्तंनाद्रियंते॥ अहोबहुभिरंगीकृतएवयुक्तःसदाचारइतिचेन्न॥ सदाचारेबहुपरिग्रहस्याप्रयोजकत्वात्॥ कलिकालेचबहवःखल्वनाचारिणः॥ वेदबाह्याश्चमृग्याएवेदानींसत्पुरुषाःनहि

व१

69

तु॰मी॰सा
॥३५॥

वहुभिःपरिगृहीतस्त्यपिवैदिकःसदाचारःअन्याहृतइतिवावैदिका
चारोदुराचारःस्यात्॥नचास्यमातुलसुतापरिणयनादिवदनाचार
स्यदृष्टरागमूलत्वेननादृष्टकल्पनायुज्यते॥तस्माद्दिहिचक्रादिधार
णानुष्टानस्यनकिंचित्दृष्टंकारणंतथासंभवतीत्यदृष्टरूपाश्रुतिरे
वप्रमाणतयाकल्पनीया॥अतोअपौरुषेयश्रुतिवाक्यगणविहित
स्यस्मृतीतिहासपुराणवचनव्रातोपबृंहितस्यस्वतःसर्वज्ञसदाचा
रसंग्रहणप्रवृत्तपरमकारुणिकपरमपुरुषप्रणीतपंचरात्रशा
स्त्रप्रतिपादितस्यपरमर्षिसंभावितस्यप्रमाणवचनैःकैश्चिदस्प
निषिद्धस्ययज्ञोपवीतादिवद्दक्षिणगतनित्यधारणस्यनानाफलसा
धनभूतस्यसकलसदाचाराधिकारापादकस्यध्यानाद्यंगभावै
रेवनिर्णीतमोक्षोपयोगस्यमालाकरणादिवन्निरुपाधिनारायण

॥३५॥

कार्यरूपस्यतस्यंचाप्युधधारणस्यसकलदेशनिवासिभिरनुष्टेयता
सिद्धेतिसर्वंसमंजसं॥इतिसुदर्शनमाहात्म्यंसमाप्तं॥अथैकादशीमहा
त्म्यं॥माहा एकादश्यांतुयःश्राद्धंप्रयच्छतिविमूढधीः॥प्रोतिनिरयान्घोरा
न्पर्यायेणैकविंशतिः॥भुंक्तेभोजयतेयस्तुपितुःप्रीत्येहरेर्दिनेपितरोन
रकंयांतिदाताभोक्तातथैवच॥सूतकेमृतकेचैवपक्षांतेश्राद्धमाचरेत्॥त
ए थैवांकादशीश्राद्धंद्वादश्यामेवकारयेत्॥देवानांचऋषीणांचपितृणांचवि
शेषतः॥अन्नंनदद्यात्तस्मिन्दिनेभगवंतंहरिंविना॥नत्पापनतथास्तेयंगु
रुतल्पंसहस्रिकृतं॥अन्नेवसंतिपापानिवासरेमधुविद्विषः॥एकादश्यांतु
योभुंक्तेश्राद्धकर्मणिमानवाः॥कवलेकवलेयातिपापंगोमांसभक्षणं॥त
स्मात्श्राद्धंद्वादश्यांसंप्रयच्छति॥पितरस्तत्प्रमायांतियावदिंद्राश्चतुर्दश॥
एकादश्यन्नदाताचतथाभोक्ताचषण्मुख॥आत्मनःपितृभिःसार्द्धंमलिने

नरकंव्रजेत्॥हरेर्दिन [illegible] अतिमानवोपे
वीसमस्तं॥नतीर्थंपात्रंनचहोमहानेनि[illegible]कागच्छतिसर्वधर्मः॥
यथाशौचादिकंश्राद्धेतत्परस्तादिधीयते॥तथाचैकादशीश्राद्धातत्कु
र्यात्तदनंतरं॥येकुर्वंतिमहीपालश्राद्धमेकादशीदिने॥त्रयस्तेनरकंया
न्तिदाताभोक्ताचतथापिता॥एकादश्यांयदाभूपमृतीहोयदिवाभवेत्॥त
द्दिनंचपरित्यज्यद्वादश्यामेवकारयेत्॥अस्तास्तमितेसूर्येमृतेचैवप्र
सूतके॥तद्दिनंतुपरित्यज्यतथैवैकादशीत्यजेत्॥तिथितर्पणेगोश्राद्धमे
देविवाहेचयज्ञकर्मविशेषतः॥नवश्राद्धेचसंप्राप्तेनत्याज्यंद्वादशीव्र
तं॥विष्णुधर्मे॥संप्राप्तेवासरेविष्णोर्येभुंजंतेपुरुषाधमाः॥युगानिसंख्यान
रकेसततंमज्जंतेहितः॥नरोभुंक्तेस्वकंमांसंतुगोमांसगरमंतथा॥नवांछि
रंमनसिनकर्मण्यंहरेर्दिने॥एकादशींदातुसंप्राप्तेम्लनाचेत्रोर्मितेऽह[illegible]॥

द्वादश्यां तु प्रदातव्यं नोपवासं नैक्वचित्॥ एकादश्यां स्वगाद्री
शामृताहोपरि वा भवेत्॥ तद्दिनं तु परित्यज्य द्वादश्यामिय
कारयेत्॥ इति गरुडपुराणे॥ अतिक्रमो हि कालस्य नैवसेवा
यकल्प्यते॥ संनिधानो निर्निमित्तो दोषाय भवति प्रिये॥ पद्म
पुराणे॥ सुरापानात् सुरश्रेष्ठ आत्मा वै पातकं व्रजेत्॥ एकादश्या
न्नकामस्तु पितृभिः सह मज्जति॥ नारदीयपुराणे॥ गर्हितान्नं नाश्नु
यं ते पितरश्च दिवौकसः॥ निष्फलं च भवेत् श्राद्धमेकादश्यां तु यत्
कृतं॥ स्कंदपुराणे॥ एकादश्यन्नदाता च तथा भोक्ता च षण्मुख॥
आत्मानं पितृभिः सार्द्धमुभयोर्नरकं व्रजेत्॥ नयेदिति नारदीये॥ भु
ङ्क्ष्व भुंक्ष्वेति यो ब्रूयात् यो भुंक्ते हरिवासरे॥ तावुभौ पतितौ स्यातां
तस्मात् श्राद्धं परेहनि॥ वक्ता [illegible]मितं श्राद्धिपेपथ्या श्राद्धं परेहनि॥

73

सुदर्शनमीमांसा ॥

तथैवैकादशीश्राद्धंप्रकुर्यात्तदनंतरं ॥ श्रीभागवतेचचतुर्थस्कंधे ॥
शिवव्रतधरायेचतानसमनुव्रताः पाषंडिनस्तेभवंतौहीसछास्त्र
परिपंथिनः ॥ नष्टशौचामूढधियोजटाभस्मास्थिधारिणः ॥ विशं
तुशिवदीक्षायांयत्रदैवंसुरासवं ॥ पद्मपुराणे ॥ यस्तास्तमितेसू
र्येमृतेचैवप्रसूतके ॥ तद्दिनंतुपरित्याज्यंतथैवैकादशीत्यजेत् ॥
वैश्वदेवोग्रतःकार्यःश्राद्धेचसमुपस्थिते ॥ संप्राप्तेपार्वणश्राद्धे
एकोद्दिष्टेतथैवच ॥ अग्रतोवैश्वदेवःस्यात्पश्चादेकादशोहनि ॥
अनिवर्त्यमहायज्ञान्श्राद्धंकार्यीतिमूढधीः ॥ प्रासुवंतद्भवेत्
श्राद्धंपितॄणांनोतिष्टते ॥ वैश्वदेवाहुतीरग्रे [illegible] द्विज [illegible]
नात् ॥ उद्दुपाद्भूतयज्ञादिश्राद्धंकु [illegible] माद्दशाहेवि
वाहेचकुर्यात्स्वस्तिकचांतिकं ॥ [illegible]

७८

सु·मी·सा
॥३८॥

शातातपोब्रवीत् ॥ इति कात्यायने ॥ याज्ञवल्क्ये ॥ वसुरुद्रादि ॥३८॥
तिसुताः पितरः श्राद्धदेवताः ॥ प्रीणयंति मनुष्याणां पितॄन् श्रा
द्धतर्पिताः ॥ वसवः पितरो ज्ञेया रुद्राश्चैव पितामहाः ॥ प्रपितां
महास्तथादित्या इत्येषा वैदिकी श्रुतिः ॥ वासुदेवो विश्वरूपोयं सुरू
पो हरिः स्मृतः ॥ रुद्रैरप्यर्च्छते यस्मात् रुद्रस्तस्माज्जनार्दनः ॥ भवि
ष्योत्तरे ॥ अनिरुद्धः स्वयं देवः प्रद्युम्नश्च पितामहः ॥ संकर्षणस्तु ज
३६ नको वासुदेवस्तु तत्पिता ॥ विष्णोर्निवेदितान्नेन यष्टव्यं देवतांतरं ॥
पितृभ्यश्चैव तद्देयं तदानंत्याय कल्प्यते ॥ यः श्राद्धकाले हरिभुक्त
शेषं ददाति भक्त्या पितृदेवतानां ॥ तेनैव पिंडाश्च तिलैर्विमिश्रितानां ॥३८
कल्पकोटि पितरस्तु तृप्ताः ॥ इति सुदर्शनमीमांसा संपूर्णा ॥ शुभमस्तु ॥ ना पृ
संवत् १७८२ शाके १६[illegible] वर्षे नभमासे कृष्णपक्षे तिथिः १२ द्वादश्यां सोम
वासरे समाप्तोयं पुस्तकः ॥ लिखितं वैष्णव आत्मारामेण पठनार्थं ॥

75

॥इतिसुदर्शनःमीमांसासमाप्तः॥

KKSU LIBRARY
RAMTEK
441 106
M-1849
Dist. Nagpur

```
[OrderDescription]
,CREATED=13.10.20 10:01
,TRANSFERRED=2020/10/13 at 10:11:49
,PAGES=76
,TYPE=STD
,NAME=S0003978
,Book Name=M-1849-SUDARSHANMI MANSA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
```

```
FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
```

```
FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
```

FILE76=00000076.TIF
,